# पञ्चदशः पाठः

# वृक्षाः सत्पुरुषाः इव

0672CH15

पर्यावरणसंरक्षणस्य विषये एका प्रदर्शिनी विद्यालये आयोजिता अस्ति। छात्राः तां प्रदर्शनीं पश्यन्ति। शिक्षकेण सह संलापं च कुर्वन्ति।




© NCERT not to be republished

**छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे ।**
**फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव ॥**



**पदच्छेदः** – छायाम् अन्यस्य कुर्वन्ति तिष्ठन्ति स्वयम् आतपे फलानि अपि परार्थाय वृक्षाः सत्पुरुषाः इव ।

**अन्वयः** – (वृक्षाः) स्वयम् आतपे तिष्ठन्ति (किन्तु) अन्यस्य छायां कुर्वन्ति, फलानि अपि परार्थाय (यच्छन्ति) (अतः) वृक्षाः सत्पुरुषाः इव (सन्ति) ।

**भावार्थः** – वृक्षाः स्वयं सूर्यस्य आतपे तिष्ठन्ति किन्तु अन्येषां प्राणिनां कृते छायां कुर्वन्ति, फलानि अपि स्वयं न खादन्ति अपि तु अन्येभ्यः एव यच्छन्ति । अतः ते सत्पुरुषाः इव सन्ति । यतः ये सज्जनाः भवन्ति, ते स्वयं कष्टानि सहित्वा अपि अन्येषां हितं कुर्वन्ति ।



**दशकूपसमा वापी दशवापीसमो ह्रदः ।**
**दशह्रदसमः पुत्रः दशपुत्रसमो द्रुमः ॥**

**पदच्छेदः** – दशकूपसमा वापी दशवापीसमः ह्रदः दशह्रदसमः पुत्रः दशपुत्रसमः द्रुमः ।

**अन्वयः** – दशकूपसमा वापी (अस्ति), दशवापीसमः ह्रदः (अस्ति), दशह्रदसमः पुत्रः (अस्ति), दशपुत्रसमः द्रुमः (अस्ति) ।

**भावार्थः** – दशकूपैः समाना एका वापी भवति । एवम् एव दशवापीसमानः एक ह्रदः भवति । दशह्रदैः समानः एकः पुत्री / पुत्रः भवति । तथैव दशसन्तानैः समानः एकः वृक्षः मूल्यवान् भवति । अर्थात् एकः वृक्षः सर्वाधिकः उपकारकः भवति । अतः सर्वे वृक्षारोपणं कुर्वन्तु ।

**अहो एषां वरं जन्म सर्वप्राण्युपजीवनम् ।**
**सुजनस्येव येषां वै विमुखा यान्ति नार्थिनः ॥**




**पदच्छेदः** – अहो! एषां वरं जन्म सर्वप्राणि-उपजीवनं सुजनस्य इव येषां वै विमुखाः यान्ति न अर्थिनः ।

**अन्वयः** – अहो! एषां सर्वप्राण्युपजीवनं जन्म वरम् (अस्ति) । सुजनस्य इव येषाम् अर्थिनः विमुखाः न यान्ति ।

**भावार्थः** – श्रीकृष्णः युधिष्ठिरं वदति - हे युधिष्ठिर! अहो! एतेषां वृक्षाणां जन्म श्रेष्ठम् अस्ति, यतः एतेषां जन्म सर्वेषां जीवानाम् उपकाराय भवति । यथा सज्जनेभ्यः जनानां निराशा न भवति तथैव वृक्षाणां समीपे आगत्य अर्थिनां जनानां निराशा न भवति । तेषाम् आशानुरूपं वृक्षाः तेभ्यः फलानि पुष्पाणि छायां च यच्छन्ति ।

**परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः ।**
**परोपकाराय दुहन्ति गावः परोपकाराय इदं शरीरम् ॥**




**पदच्छेदः** – परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः परोपकाराय दुहन्ति गावः परोपकाराय इदं शरीरम् ।

**अन्वयः** – वृक्षाः परोपकाराय फलन्ति, नद्यः परोपकाराय वहन्ति, गावः परोपकाराय दुहन्ति, परोपकाराय (एव) इदं शरीरम् (अस्ति) ।

**भावार्थः** – वृक्षस्य फलानि अन्ये खादन्ति, न तु वृक्षः स्वयं खादति । नदीनां जलस्य उपयोगम् अपि अन्ये एव प्राणिनः कुर्वन्ति । गावः अपि अन्येषां कृते एव दुग्धं यच्छन्ति । एवमेव अस्माकं जीवनम् अपि अन्येषाम् उपकाराय भवतु ।

**पुष्प-पत्र-फलच्छाया-मूल-वल्कल-दारुभि:।**
**धन्या महीरुहा येषां विमुखा यान्ति नार्थिन: ।।**



**पदच्छेद:** – पुष्प-पत्र-फल-छाया-मूल-वल्कल-दारुभि:
धन्या: महीरुहा: येषां विमुखा: यान्ति न अर्थिन: ।

**अन्वय:** – येषां पुष्प-पत्र-फल-छाया-मूल-वल्कल-दारुभि: अर्थिन: विमुखा: न यान्ति (ते) महीरुहा: धन्या: (सन्ति) ।

**भावार्थ:** – प्राणिन: वृक्षात् पुष्पाणि, पत्राणि, फलानि, छायां, मूलानि, वल्कलानि काष्ठानि च प्राप्नुवन्ति। अर्थात् वृक्षाणां पार्श्वे यत् किमपि अस्ति तत् सर्वम् अपि प्राणिनां कृते एव अस्ति। वृक्षा: कदापि याचकान् निराशान् न कुर्वन्ति। अत: वृक्षा: धन्या: सन्ति।

**पिबन्ति नद्य: स्वयमेव नाम्भ:**
**स्वयं न खादन्ति फलानि वृक्षा: ।**
**नादन्ति सस्यं खलु वारिवाहा:**
**परोपकाराय सतां विभूतय: ।।**



**पदच्छेद:** – पिबन्ति नद्य: स्वयम् एव न अम्भ:, स्वयं न खादन्ति फलानि वृक्षा: । न अदन्ति सस्यं खलु वारिवाहा:, परोपकाराय सतां विभूतय: ।

**अन्वय:** – नद्य: अम्भ: स्वयम् एव न पिबन्ति। वृक्षा: अपि फलानि स्वयं न खादन्ति। वारिवाहा: (अपि) सस्यं न अदन्ति खलु। (यत:) सतां विभूतय: परोपकाराय (भवन्ति)।

**भावार्थ:** – नद्य: स्वीयं जलं स्वयं न पिबन्ति अपितु अन्येषाम् उपयोगाय यच्छन्ति। एवम् एव वृक्षा: अपि फलानि स्वयं न खादन्ति। मेघा: अपि जलं वर्षन्ति, किन्तु वृष्ट्या उत्पन्नं सस्यं स्वयं न खादन्ति। अनेन प्रकारेण सज्जनानां सम्पद: अपि परोपकाराय भवन्ति।

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| आतपे | सूर्यतापे | धूप में | In the sunlight | |
| परार्थाय | अन्येषाम् उपकाराय | दूसरों के उपकार के लिए | For the sake of others | |
| सत्पुरुषाः | सज्जनाः | सज्जन लोग | Noble men | |
| वापी | दीर्घिका | बावड़ी | Stepwell | |
| ह्रदः | सरोवरः | तालाब / झील | Pond/ Lake | |
| द्रुमः | वृक्षः | पेड़ | Tree | |
| वरम् | श्रेष्ठम् | श्रेष्ठ | Best | |
| अर्थिनः | प्राप्तुम् इच्छुकाः | प्राप्त करने के इच्छुक | Wishing to receive | |
| वहन्ति | प्रवहन्ति | बहती है | Flows | |
| वल्कलम् | वृक्षस्य त्वक् | पेड़ की छाल | Bark of tree | |
| दारुभिः | काष्ठैः | लकड़ियों से | By Wood | |
| महीरुहाः | वृक्षाः | पेड़ | Trees | |
| अम्भः | जलम् | पानी | Water | |
| वारिवाहाः | मेघाः | बादल | Clouds | |
| विभूतयः | समृद्धयः | समृद्धियाँ | Manifestations | |

© NCERT not to be republished



## वयम् अभ्यासं कुर्मः

१. पाठे लिखितानि सुभाषितानि सस्वरं पठन्तु, अवगच्छन्तु, लिखन्तु स्मरन्तु च।

२. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु।

(क) वृक्षाः स्वयं कुत्र तिष्ठन्ति ?

(ख) परोपकाराय काः वहन्ति ?

(ग) दशवापीसमः कः भवति ?

(घ) सत्पुरुषाः इव के सन्ति ?

(ङ) अर्थिनः केभ्यः विमुखाः न यान्ति ?

(च) वृक्षाः स्वयं कानि न खादन्ति ?



**३. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु।**

(क) नद्यः किं न पिबन्ति ?

(ख) वृक्षाः अस्मभ्यं किं किं यच्छन्ति ?

(ग) इदं शरीरं किमर्थम् अस्ति ?

(घ) दशपुत्रसमः कः भवति ?

(ङ) केषां विभूतयः परोपकाराय भवन्ति ?

(च) अन्यस्य छायां के कुर्वन्ति ?



**४. पट्टिकातः उचितानि पदानि चित्वा रिक्तस्थानानि पूरयन्तु।**

| | | | | | | |
|---|---|---|---|---|---|---|
| तिष्ठन्ति | सुजनस्येव | विभूतयः | वृक्षाः | फलानि | दशपुत्रः | परोपकाराय |

**यथा** – छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।

(क) फलान्यपि परार्थाय ................................ सत्पुरुषा इव।

(ख) दशह्रदसमः पुत्रः ................................ समो द्रुमः।

(ग) ................................ येषां वै विमुखा यान्ति नार्थिनः।

(घ) ................................ इदं शरीरम्।

(ङ) स्वयं न खादन्ति ................................ वृक्षाः।

(च) परोपकाराय सतां ................................।



**५. उदाहरणानुसारम् अधोलिखितेषु वाक्येषु स्थूलाक्षरपदानां विभक्तिं निर्दिशन्तु।**

**यथा** – वृक्षाः अन्यस्य कृते **छायां** कुर्वन्ति। ...द्वितीया विभक्तिः...

(क) वृक्षाः परार्थाय **फलानि** यच्छन्ति। ................................

(ख) वृक्षाः **सत्पुरुषाः** इव सन्ति। ................................

(ग) **द्रुमः** दशसन्तानसमः भवति। ................................

(घ) वृक्षः **प्राणिभ्यः** काष्ठानि यच्छति। ................................

(ङ) **नद्यः** जलं स्वयमेव न पिबन्ति। ................................

(च) सज्जनानां **सङ्गतिं** करोतु। ................................

© NCERT not to be republished

६. **अधोलिखितानां पदानां द्विवचने बहुवचने च रूपाणि लिखन्तु।**

| | | |
|---|---|---|
| यथा – वृक्ष: | वृक्षौ | वृक्षा: |
| (क) मेघ: | ........................ | ........................ |
| (ख) ह्रद: | ........................ | ........................ |
| (ग) सत्पुरुष: | ........................ | ........................ |
| (घ) छाया | ........................ | ........................ |
| (ङ) वापी | ........................ | ........................ |
| (च) नदी | ........................ | ........................ |
| (छ) शरीरम् | ........................ | ........................ |
| (ज) पुष्पम् | ........................ | ........................ |

७. **अधोलिखितानां पदानां परस्परं समुचितं मेलनं कृत्वा 'क: किं ददाति' इति लिखन्तु।**

| | | |
|---|---|---|
| (क) वृक्ष: | दुग्धम् | वृक्ष: शुद्धं वायुं ददाति। |
| (ख) गौ: | प्रकाशं | ........................ |
| (ग) सूर्य: | विद्यां | ........................ |
| (घ) नदी | शुद्धं वायुं | ........................ |
| (ङ) अग्नि: | जलम् | ........................ |
| (च) शिक्षक: | तापं | ........................ |


८. **अधोलिखितानां क्रियापदानां लट्लकारे प्रथमपुरुषस्य रूपाणि लिखन्तु।**

| | | | |
|---|---|---|---|
| यथा - कुर्वन्ति – | करोति | कुरुत: | कुर्वन्ति |
| तिष्ठन्ति – | ........................ | ........................ | ........................ |
| फलन्ति – | ........................ | ........................ | ........................ |
| यान्ति – | ........................ | ........................ | ........................ |
| पिबन्ति – | ........................ | ........................ | ........................ |
| खादन्ति – | ........................ | ........................ | ........................ |

© NCERT not to be republished

## योग्यताविस्तरः

१. अधोलिखितां प्रहेलिकां पठित्वा उत्तरं वदन्तु।



वृक्षाग्रवासी न च पक्षिराजः
त्रिनेत्रधारी न च शूलपाणिः।
त्वग्वस्त्रधारी न च सिद्धयोगी
जलं च बिभ्रन्न घटो न मेघः॥



## परियोजनाकार्यम्

१. विद्यालयं गृहं वा परितः विद्यमानानां पञ्च-पादपानां (वृक्षाणां) संरक्षणं कुर्वन्तु।

२. अन्तर्जालस्य साहाय्येन परोपकारविषये दश-सुभाषितानां संग्रहणं कुर्वन्तु।

© NCERT not to be republished